**SN – 098**

# I Semester B.Com. Examination, Nov./Dec. 2014
## (Freshers) (CBCS) (2014-15 and Onwards)
## LANGUAGE SANSKRIT – I
## Yakshaprashna Sangraha, Grammar and Comprehension

Time : 3 Hours Max. Marks : 70

***Instructions :*** *1) Answer in* ***Sanskrit, Kannada*** *or* ***English.***
*2) Answer questions* ***I, V*** *and* ***VI*** *in* ***Sanskrit*** *only.*

I. समीचीनं उत्तरं चिनुत। (10×1=10)

ಸರಿಯಾದ ಉತ್ತರವನ್ನು ಆರಿಸಿ ಬರೆಯಿರಿ.

Select the correct answer.

1) महाभारतस्य कर्ता क: ?

अ) व्यास: आ) वाल्मीकि: इ) गुणाढ्य: ई) कालिदास:

2) महाभारते कति श्लोका: सन्ति ?

अ) 6800 आ) 8800 इ) 24000 ई) 100000

3) जलमानेतुं युधिष्ठिर: प्रथमत: कम् प्रेषितवान् ?

अ) अर्जुनं आ) नकुलं इ) भीमसेनं ई) सहदेवं

4) हतान् भ्रातृन् दृष्ट्वा क: विललाप ?

अ) युधिष्ठिर: आ) भीम: इ) अर्जुन: ई) नकुल:

5) भीमस्य अपरं नाम किम् ?

अ) धर्मराज: आ) जिष्णु: इ) वृकोदर: ई) पार्थ:

6) केन श्रोत्रिय: भवति ?

अ) तपसा आ) धृत्या इ) श्रुतेन ई) बुद्धिमता

7) क: पण्डित: ज्ञेय: ?

अ) धर्मज्ञ: आ) नास्तिक: इ) वैयाकरण: ई) तन्त्रज्ञ:

8) हतभ्रातृषु युधिष्ठिर: कं जीवितुमिच्छति ?

अ) भीमसेनं आ) अर्जुनं इ) नकुलं ई) सहदेवं

9) निवपतां वरं किम् ?

अ) वर्षं आ) बीजं इ) गाव: ई) पुत्र:

10) खात् उच्चतरं किम् ?

अ) माता आ) पिता इ) भ्राता ई) जाया

II. **द्वयो:** प्रश्नयो: उत्तरं लिखत । (2×10=20)

ಎರಡು ಪ್ರಶ್ನೆಗಳಿಗೆ ಉತ್ತರಿಸಿ.

Answer **any two** questions.

1) महाभारतस्य कर्तृ–कालश्च ।

ಮಹಾಭಾರತದ ಕರ್ತೃ–ಕಾಲ.

Authorship and date of Mahabharata.

2) युधिष्ठिरस्य विलाप: ।

ಯುಧಿಷ್ಠಿರನ ವಿಲಾಪ.

Lamentations of Yudhisthira.

3) यक्ष–युधिष्ठिरयो: प्रश्नोत्तराणि संगृह्य लिखत ।

ಯಕ್ಷ–ಯುಧಿಷ್ಠಿರ ಇವರ ಪ್ರಶ್ನೋತ್ತರಗಳನ್ನು ಸಂಗ್ರಹಿಸಿ ಬರೆಯಿರಿ.

Write about the questions and answers ensured between Yaksha and Yudhisthira.

III. **त्रयाणां** श्लोकानां अनुवादं कृत्वा विवृणुत । (3×4=12)

ಮೂರು ಶ್ಲೋಕಗಳನ್ನು ಅನುವಾದಿಸಿ ವಿವರಿಸಿ.

Translate and explain **any three** slokas.

1) नास्य जेता रणे कश्चिदजेता नैष कस्यचित् ।
सोऽयं मृत्युवशं यात: कथं जिष्णुर्महाबल: ।।

2) रुद्राणां वा वसूनां वा मरुतां वा प्रधानभाक् ।
पृच्छामि को भवान् देवो नैतच्छकुनिना कृतम् ।।

3) किं ब्राह्मणानां देवत्वं कश्च धर्म: सतामिव ।
कश्चैषां मानुषो भाव: किमेषामसतामिव ।।

4) पुत्र आत्मा मनुष्यस्य भार्या दैवकृत: सखा।
उपजीवनं च पर्जन्य: दानमस्य परायणम्।।

5) सन्तो दिक्जलमाकाशं गौरन्नं प्रार्थना विषम्।
श्राद्धस्य ब्रह्मण: काल: कथं वा यक्ष मन्यसे।।

IV. **द्वयो:** वाक्ययो: ससन्दर्भं विवृणुत। **(2×4=8)**
ಎರಡು ವಾಕ್ಯಗಳನ್ನು ಸಂದರ್ಭ ಸಹಿತ ವಿವರಿಸಿ.
Explain with reference to context **any two** sentences.

1) यमौ यदेतौ दृष्ट्वाद्य पतितौ नावदीर्यते।
2) गाहमानश्च तत्तोयमन्तरिक्षात् स शुश्रुवे।
3) मन: शीघ्रतरं वातात् चिन्ता बहुतरी।
4) भृत्येषु भरणार्थं वै भयार्थं चैव राजसु।

V. **संस्कृतभाषया** उत्तरं लिखत।
ಸಂಸ್ಕೃತಭಾಷೆಯಲ್ಲಿ ಉತ್ತರಿಸಿ.
Answer in **Sanskrit.**

1) **पञ्चानां** लिङ्ग-विभक्ति-वचनानि लिखत। **(5×1=5)**

| | | | |
|---|---|---|---|
| 1) भीमसेनं | 2) त्वाम् | 3) मे | 4) भ्रातर: |
| 5) भार्या | 6) गृहे | 7) मनुष्यस्य | 8) ब्राह्मणे |

2) **पञ्चानां** लकार-पुरुष-वचनानि लिखत। **(5×1=5)**

| | | | |
|---|---|---|---|
| 1) पिब | 2) उवाच | 3) व्याकरोषि | 4) जायते |
| 5) तिष्ठति | 6) पृच्छामि | 7) जीवतु | 8) चलिष्यामि |

VI. इमं परिच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत। **(5×2=10)**
वाराणस्यां सर्वसारो नाम कश्चन् धनवान् आसीत्। एकदा स: रात्रौ निद्रामग्न: आसीत्। भित्तौ सन्धिं कृत्वा स्तेन: तद्गृहं प्राविशत्। गृहस्य प्राङ्गणे रासभ: बन्धितो बभूव। देहली समीपे शुनक: विश्राम्यति स्म। गार्दभ: पप्रच्छ "स्तेन: गृहं प्रविष्टोऽस्ति। तत् त्वं न जानीषे। किमर्थं उच्चै: न बुक्कसि यजमानं जागृतं न करोषि च। शुनकआह –" मित्र, मम कर्तव्यविषये मा वादं कुरु। अस्मद्विषये यजमानस्य अनादरं किं त्वं न जानीषे ? चोर: सर्वमादाय गच्छतु। तदा यजमान: ज्ञास्यति आवयो: महत्वम् इति।

**प्रश्ना:**

1) सर्वसार: कुत्र आसीत् ?
2) स्तेन तद्गृहं कथं प्राविशत् ?
3) गृहस्य प्राङ्गणे क: बन्धितो बभूव ?
4) शुनक: कुत्र विश्राम्यति स्म ?
5) शुनक: किं आह ?

---